केरलपाठावलिः

# अध्यापकपुस्तकम्

# संस्कृतम्

## नवमी कक्ष्या

अकादमिक-संस्कृतविद्यालयानां कृते।

KERALA READER

# TEACHER TEXT

# SANSKRIT

STANDARD

# IX

FOR ACADEMIC AND SANSKRIT SCHOOLS



Government of Kerala
Department of General Education

2024
State Council of Educational Research and Training (SCERT), Kerala

केरलपाठावलिः

# अध्यापकपुस्तकम्

# संस्कृतम्

## नवमी कक्ष्या

अकादमिक-संस्कृतविद्यालयानां कृते।

KERALA READER

# TEACHER TEXT

# SANSKRIT

STANDARD

# IX

FOR ACADEMIC AND SANSKRIT SCHOOLS

Government of Kerala
Department of General Education

2024
State Council of Educational Research and Training (SCERT), Kerala

## अध्यापकपुस्तकं नाम किम्? किमर्थम्?

अधिकाराधिष्ठितविद्याभ्यासः इति लक्ष्यं सम्पादयितुं छात्राणां सर्वतोमुखविकासाय आयोजिता इयं परिष्कृता पाठ्यपद्धतिः। एतदनुसारं पठनप्रवर्तनानाम् आसूत्रणे निर्वहणे च सामर्थ्यसम्पादनाय तथा मूल्यनिर्णयप्रवर्तनानाम् आसूत्रणे निर्वहणे अध्यापकान् शक्तान् कर्तुं साहायकं भवति इदम् अध्यापकमित्रम्।

अस्मिन् पुस्तके पठनाधिगमाः पठनप्रवर्तनानि मूल्यनिर्णयोपाधयः अधिकवाचनांशः प्रवर्तनपुटानि इत्यादीनि कार्याणि अन्तर्भवन्ति। अधिकपठनाय साध्यतायाः उपयोगक्रमः पाठासूत्रणानि वार्षिकासूत्रणं च अस्मिन् आयोजितानि। पठनाधिगमानां प्राप्त्यर्थं यानि यानि प्रवर्तनानि आवश्यकानि तानि सर्वाणि सफलीकर्तुं स्वातन्त्र्यम् अध्यापकानाम् अस्ति।

विषयवस्त्वधिष्ठितरूपेणैव(Thematic)अस्माकंपुस्तकस्यरचना। विषयवस्त्वाधारेण प्रत्येकमेककं समाकलितम्। अतः अध्यापकपुस्तके एककस्य आमुखं सन्निवेशितम्। तदनन्तरं विषयवस्तुप्रवेशनमुद्दिश्य (Theme) एककप्रवेशिकापि विद्यते। एककरूपरेखापि अत्र प्रदत्ता।

तदनन्तरं पाठभागस्य आमुखं पठनाधिगमाः आर्जनीयानि मूल्यानि मनोभावाश्च वर्तन्ते। पुनः पठनोपकरणानि तथा कालांशश्च प्रदत्तानि।

पाठस्य संग्रहरूपेण पाठापग्रथनं, पश्चात् पाठभागस्य स्वाभाविकप्रवेशनम् उद्दिश्य प्रवेशिका च निर्दिष्टा। पुनः श्रवण-वाचन-स्वांशीकरणार्थं बहूनि पठनप्रवर्तनानि निरूपितानि। अनन्तरम् अवश्यञ्चेत् स्वीकर्तुम् अधिकप्रवर्तनानि समायोजितानि। प्रवर्तनैः साकं मूल्यनिर्णयोपाधिश्च समावेशिता(स्वयंमूल्यनिर्णयः, अधिसङ्घमूल्यनिर्णयः,

Draft Copy

अध्यापकमूल्यनिर्णयश्च)। प्रत्येकं मूल्यनिर्णयसूचिकापि प्रदत्ता। पठनोत्पन्नानाम् एकैकमुदाहरणम् सर्वत्र प्रदत्तम्।

अधिवाचनांशा: आवश्यानुसारं संयोजिताः। तदनन्तरम् अनन्तरपाठभागं प्रवेष्टुं चाक्रिकारोहणप्रक्रिया समावेशिता। छात्राणां मनसि स्वाभाविकतया विषयपरिणामो अस्य उद्देश्यम्। एककस्यान्ते एककानुसारीमूल्यनिर्णय: कार्य:। विषयवस्तूनां क्रोडीकरणप्रक्रिया च अन्तर्भावित:।

अनेन रूपेण कक्ष्यानुसारं प्रवर्तनानि आयोजनीयानि। अध्यापकस्य पाटवानुसारं तत् कर्तुं शक्यते। अधिकवाचनांशा: एवम् अधिकप्रवर्तनानि च समयावधिकमूल्यनिर्णयाय न निरूपितानि। प्रत्येकम् अध्यापक:, पूर्वोक्तरीत्या छात्राणां पठनं सफलम् कर्तुं यतताम्। तदर्थम् अध्यापकमित्रं सप्रयोजकं भूयात्।

# पाठासूत्रणम्

पाठस्य नाम :
दिनाङ्कः :
अपेक्षितः समयः :
आशयः :
उपाशयः :
व्यवहाररूपः :
पठनलक्ष्याः :
अशयपरः :
भाषापरः :
अध्ययनसामग्री :
अपेक्षिताः उत्पापन्नाः :

| प्रक्रिया पुटम् | प्रतिकरण पुटम् |
|---|---|
| मूल्यानिर्णयसहायिकाः प्रक्रियाः | मूल्यनिर्णीताः सूचकाः अत्र लेखनीयाः |

प्रधानाध्यापकस्य हस्ताक्षरम्        शिक्षकस्य हस्ताक्षरम्

Draft Copy

# प्रतिफलनात्मकचिन्ता

मम निरीक्षणानि, मम प्रत्यभिज्ञाः

1
2
3

अनुवर्तमानानि प्रवर्तनानि, परिहारप्रवर्तनानि च।

1
2
3

Draft Copy


# वार्षिकासूत्रणम्

| एककम् | पाठः | मासः | कालांशः |
|---|---|---|---|
| **पल्लवम्** | विश्वसौन्दर्यम् | जूण् | 10 |
| | जीवातुरेव द्रुमः | जूण्-जूलाय् | 15 |
| **पलाशम्** | सुखजीवनम् | जूलाय्-ओगस्ट् | 10 |
| | क्षुधा ज्ञानप्रदायिनी | आगस्ट् | 15 |
| | हितमेवाऽनुयात् सदा | सेप्टम्पर् | 10 |
| **कुड्मलम्** | मयूरशिखा | सेप्टम्पर्-ओक्टोबर् | 10 |
| | नियम्यतां स्वयम् | ओक्टोबर्- नवम्पर् | 15 |
| | गच्छामो वयम् | नवम्पर्-डिसम्पर् | 10 |
| **प्रसूनम्** | कारुण्यम् | जनुवरि | 15 |
| | मुक्तकसौभगम् | फेब्रुवरि | 10 |

Draft Copy

# एककम् १
# पल्लवम्

## आमुखम्

उच्चविद्यालयस्तरस्य पूर्वस्मिन् वर्गे संस्कृतपठनस्य यद्बीजावापं कृतं तदस्य वर्गस्य अस्मिन्नेकके पल्लवितं भवति। पल्लवाख्ये प्रथमे एतस्मिन्नेकके द्वौ पाठौ स्तः। प्रथमं प्रकृतेः सौन्दर्यस्य वर्णनं कृत्वा विरचितं विश्वसौन्दर्यम् नाम गीतम्, द्वितीयं सस्यानामपि जीवनमस्ति, अतः तेषां परिपालनम् अस्माभिः कर्त्तव्यम् इति उद्बोधयितुं काचित् लघुकथा च।

Draft Copy


# पाठः १ विश्वसौन्दर्यम्।

| | | |
|---|---|---|
| एककम् | : | १ |
| आशयः | : | परितःस्थितेः संरक्षणम्। |
| उपाशयः | : | बालः परितःस्थितिश्च। |
| व्यवहाररूपम् | : | बालकविता। |
| कालांशः | : | अष्ट |
| पाठसंख्या | : | १ |
| पाठस्य नाम | : | विश्वसौन्दर्यम्। |

पठनलक्ष्यम्

<u>आशयपरम्</u>

- पर्यावरणस्य संरक्षणमधिकृत्य चर्चां कृत्वा लघुटिप्पणीं रचयति।
- प्रकृतिविभवानां मितोपयोगं कर्तुम् जनान् बोधयितुं विज्ञप्तिपत्रं रचयति।

<u>भाषापरम्</u>

- बालकवितां तालालयानुसारम् आलपति।
- नूतनपदानि चित्वा अर्थं लिखति।
- समस्तपदानां विग्रहवाक्यं लिखति।
- उपसर्गान् विविच्य लिखति।
- प्रयोगविशेषं ज्ञात्वा उदाहरणवाक्यानि लिखति।
- कवितायाः आशयं लघूपन्यासरूपेण परिवर्त्य लिखति।
- समानाशययुक्तानां बालकवितानां सम्पुटं रचयति।

Draft Copy

**आमुखम्** विश्वमिदं सर्वचराचरणां वासस्थानं भवति। वृक्षलतादयः पक्षिमृगादयः कृमिकीटादयश्च अत्र निवसन्ति। तदा कूपनदीतटाकादयः जलाशयाः पर्वताः मरुप्रदेशाः केदाराः महारण्यानि च अत्र दृश्यते। एवं सुसम्पन्नं सुन्दरं वैविध्यपूर्णं विश्वमिदं पञ्चभूतात्मकमिति वदन्ति। अतः भूमिः, जलं, वायुः, आकाशं, तेजः इत्येतेषां संरक्षणम् अस्माभिः अवश्यं करणीयमिति अवबोधोत्पादनमेव पठस्यास्य उद्देश्यम्।

**पाठविवरणम्** प्रकृतौ दृश्यमानानि वस्तूनि अधिकृत्य कवितारूपेण अत्र वर्णयति। प्रकृतिविभवानां संरक्षणमेव अस्य कवितायाः मुख्याशयः। परितः इति शब्दस्य प्रयोगविशेषः, उपसर्गाणां परिचयः च भाषापरौ अंशौ।

**उद्ग्रथनसमीपनम्** जलमलिनीकरणम्, वायुमलिनीकरणम्, शब्दमलिनीकरणम्, ऊर्ज्जनशीकरणम्, पर्वतनशीकरणम् इत्यादिभिः सर्वत्र पञ्चभूतानां नाशनम् अधुना द्रष्टुं शक्यते। विश्वमिदं पञ्चभूतात्मकं भवति, तेषां नाशनम् न केवलं मानवानां किन्तु सर्वभूतानां नाशाय भविष्यति इति प्रबोधं जनयितुं समर्थोऽस्ति अयं पाठभागः। सामूहिक-परितःस्थितिशास्त्राभ्यां सह सम्बन्धितोऽस्ति पाठभागोऽयम्। विश्वस्य सौन्दर्यपरिरक्षणम् अस्मत्प्रपञ्चस्य संरक्षणमेवेति छात्राः जानन्तु।

**प्रश्ननिर्धारणम्** आत्मनः एव कालिकां सुस्थितिं कामयमानो जनः अन्येषां जन्तूनां स्वस्थतामधिकृत्य न किमपि चिन्तयति।

Draft Copy


अतः जलचूषण-वननशीकरण-शब्दघोषणादिभिः परितःस्थितिं सदा दूषयति। परितःस्थितेः परिपालनमस्माकं कर्तव्यमिति चिन्तयन् एकैकोऽपि छात्रः तस्य संरक्षणाय सज्जो भवेत्। तादृशीं चिन्तां जनयितुं पाठोयं पर्याप्तो भवति।

**प्रवेशः** विविधानि प्रकृतिदृश्यानि प्रदर्श्य प्रश्नान् पृष्ट्वा वा पाठप्रवेशः करणीयः।

**पठनप्रवर्तनानि।**

**प्रक्रिया- 1** **बालकवितानां तालल्यानुसारम् आलपनम्**

पठितपूर्वाणां बालकवितानाम् आलपनाय अध्यापिका छात्रान् निर्दिशति अथवा काश्चन बालकविताः श्रावयति।अनन्तरं तालल्यानुसारं पाठभागम् आलपन्तु छात्राः। मूल्यनिर्णयं च करोति। (अध्यापक-संङ्घ-वैयक्तिकरूपेण)

**प्रक्रिया- 2** **नूतनपदानि चित्वा अर्थं लिखतु।**

शब्दकोशं निरीक्ष्य पाठभागस्थानां नूतनपदानां अर्थं प्रादेशिकभाषया संस्कृतभाषया वा लेखनाय निर्दिशति।

**प्रक्रिया- 3** **उपसर्गयुक्तपदानि चित्वा लिखतु।**

को नाम उपसर्गः? इति अध्यापिका प्रथममेव सोदाहरणं प्रस्तौति । (पाठभागस्थम् अधिकवाचनांशं पश्यतु- पु-13) अनन्तरं पाठभागे उपसर्गसहितानि यानि पदानि सन्ति तानि चित्वा लेखनाय निर्दिशति।

यथा- विराजन्ते- प्रवाति- विभाति- प्रत्यायान्ति।

Draft Copy

## उपसर्गयुक्तानां केषाञ्चन क्रियापदानां पट्टिका।

| उपसर्गः | क्रियारूपम् |
|---|---|
| प्र | प्रवहति, प्रविशति, प्रहरति, प्रार्थयति, प्रकाशते। |
| परा | पराभवति, परापतन्ति, परैति, पराजयते, पराक्रमते। |
| अप | अपसरति, अपगच्छति, अपवदति, अपैति, अपेक्षते। |
| सम् | सम्भवति, सम्मिलति, सङ्कोचयति, सङ्गच्छते, समर्थयते। |
| अनु | अनुभवति, अनुसरति, अनुतपति, अनुयाति, अनुकरोति। |
| अव | अवरोहति, अवगच्छति, अवैति, अवार्च्छति, अवेक्षते। |
| निस् | निस्तरति, निष्क्रामति, निष्कासति, निष्कर्षयति, निष्कुरुते। |
| निर् | निर्गच्छति, निर्माजयति, निरूहति, निर्गलति, निरीक्षते। |
| दुस् | दुश्चरति, दुस्तरति, दुस्पृशति, दुस्स्मरति, दुष्कुरुते। |
| दुर् | दुर्गच्छति, दुरभिलषति, दुराचरति, दुर्मिलति, दुर्भाषते। |
| वि | विकसति, विलपति, वितरति, विभजते, वितनुते। |
| आङ् | आरोहति, आगच्छति, आलपति, आनयति, आचिनोति। |
| नि | निवारयति, निवसति, निक्षिपति, निमज्जति, निकषते। |
| अभि | अभिजानाति, अभ्यर्चति, अभ्यर्हति, अभ्यसति, अभिभाषते। |
| अपि | (अ) पिदधाति, अप्यूहति, अपिकृन्तति, अपिनयति,अप्येति। |
| अति | अतिक्रामति, अत्यर्हति, अत्येति, अतितिष्ठति, अतिशेते। |

| | |
|---|---|
| अधि | अधिगच्छति, अधिक्षिपति, अध्येति, अधिक्रामति,अधिरक्षति। |
| प्रति | प्रत्येति, प्रतिगच्छति, प्रतिकूजति, प्रतीयते, प्रतीक्षते। |
| सु | सुतिष्ठति, सुकुरुते, सुशोभते, सुभाषते, सुगम्यते। |
| उद् | उद्घाटयति, उदाहरति, उत्पतति, उन्नमति, उत्प्लवते। |
| परि | परिपालयति, परिणयति, परिष्करोति, परितप्यते, परिवर्तते। |
| उप | उपकरोति, उपार्जति, उपवसति, उपोक्षति, उपास्ते। |

**കുറിപ്പ് 1-** ചില ഉപസർഗങ്ങളുടെ അന്ത്യസ്വരം ഘഞ് അന്തങ്ങളായുള്ള ഉത്തരപദത്തോട് ചേരുമ്പോൾ ദീർഘിക്കാറുണ്ട്. പ്രതികാരഃ/പ്രതീകാരഃ, പരിഹാസഃ /പരീഹാസഃ, അധികാരഃ /അധീകാരഃ എന്നിങ്ങനെ. ഇവിടെ രണ്ടുരൂപങ്ങൾക്കും ഒരേ അർത്ഥമായിരിക്കും. എന്നാൽ ചില ഉപസർഗ്ഗങ്ങൾ ദീർഘിച്ചാൽ അർത്ഥഭേദം വന്നേക്കാം. ഉദാ - പ്രസാദഃ (തെളിച്ചം), പ്രാസാദഃ (മാളിക), പ്രകാരഃ(വിധം), പ്രാകാരഃ (മതിൽ). അധികവിവരത്തിന് "ഉപസർഗസ്യ ഘഞ്യമനുഷ്യേ ബഹുലം" (6-3-122), "സാദകാരയോഃ കൃത്രിമേ ദീർഘഃ" തുടങ്ങിയ നിയമങ്ങൾ നോക്കുക.

**കുറിപ്പ്-2** ഉപസർഗങ്ങൾ ചേരുമ്പോൾ ചില പരസ്മൈപദി ധാതുകൾ ആത്മനേപദങ്ങളായും ചില അത്മനേപദി ധാതുക്കൾ പരസ്മൈപദിയായും മാറുന്നു.

ഉദാ- ജയതി - വിജയതേ, പരാജയതേ. രമതേ- വിരമതി- ആരമതി

**अनुबन्धप्रवर्तनम्** अनन्तरं सामान्यानि उपसर्गयुक्तानि च क्रियापदानि मिश्रीकृत्य छात्रेभ्यो ददाति। तस्मादपि उपसर्गसहितानि क्रियापदानि चित्वा लेखनाय च निर्दिशति।

Draft Copy

<u>क्रियापदानि।</u>

**[पठति, विरमति, नमामि, आगच्छति, समाहरति, प्रहरति, प्रविशति, हरति, विहरति, क्षिपति, प्रणमति, संस्तुवन्ति, समागच्छति, प्रक्षालयति, विचिन्तयति, निक्षिपति, जिज्ञासयति, भवति, आविर्भवति, करोति, आविष्करोति, परिष्करोति, निर्मार्जयति, निराकरोति, अलंकरोति, प्रादुर्भवति।....]**

<u>विशिष्य बोधव्यम्।</u>

प्रादुर्, आविस्, अलं इत्यादीनि अव्ययानि प्रादिषु द्वाविंशतिसंख्येषुउपसर्गेषुनभवन्तिइतिप्रत्येकंबोधनीयम्। अतः आविष्करोति, प्रादुर्भवति, अलंकरोति, नमस्करोतु इत्येतानि उपसर्गयुक्तपदानि इति वक्तुं न शक्यते। न केवलं क्रियापदेषु किन्तु नामपदेष्वपि उपसर्गयोजना भवति। यथा - प्रहारः, आहारः, संहारः,विहारः परिहारः, दुर्मतिः, सुमतिः, सुजनः, दुर्जनः, सुलभः, निर्दोषः...।

**प्रक्रिया- 4 प्रयोगविशेषणं ज्ञात्वा उदाहरणानुसारं वाक्यानि लिखतु।**

परितः इति शब्दस्य योगे का विभक्तिः भवति ? इति अध्यापिका सोदाहरणं वदति। अनन्तरं पाठभागस्थं प्रयोगं चित्वा लेखनाय निर्दिशति। अभ्यासं च कारयति।

‘अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि’ इति वार्तिकवचनेन अभितःपरितः इत्येतेषाम् अव्ययानां योगे द्वितीयाविभक्तिर्भवति। उदाः - अभितः ग्रामम्। परितः वृक्षम् । विद्यालयं परितः मार्गाः सन्ति। वृक्षं परितः तृणानि न सन्ति।

Draft Copy


**प्रक्रिया- 5** **कवितायाः आशयं सूचनानुसारं लघूपन्यासरूपेण परिवर्त्य लिखति।**

उपन्यासलेखनाय काश्चन सूचनाः अत्र प्रदत्ताः । ताः केवलम् आशयावगमनाय कल्पिताः ताः स्वीकृत्य स्ववाक्यैः उपन्यासः लेखनीयः।

**मातृका**

सूचना - विश्वसौव्दर्यम्- पञ्चभूतानि - नदीतडादयः- वृष्टिः- ऋतवः-परितःस्थितेः पालनम्।

अस्माकं निवासभूमिः अतीवसुन्दरा भवति। सर्वेषां चराचराणां वासस्थानेव विदितेयं स्वर्गीयसमानं सुखं सर्वदा वितरति। अनेके पर्वताः, नद्यः, केदाराः, उपवनानि च अत्र विराजन्ते। तरुलतादिभिः सम्पन्नेस्मिन्वनेसुगन्धपवनः वाति। ऋतुभेदेषु नानाविधानि कुसुमानि विकसन्ति। एवं सर्वप्रकारेण सौन्दर्यसम्पन्नमिदंविश्वंअस्माभिः सर्वथा परिपालितव्यंभवति।

**विशेषप्रवर्तनम्-1** **पाठभागस्थं गीतकं प्रादेशिकभाषायां यावच्छक्यं गीतरूपेण परिवर्त्य लिखति।**

**मातृका-**

വിശാലസുന്ദരലോകം കാണ്മൂ
നയനാനന്ദകരം
സർവചരാചരവാസസ്ഥാനമി-
തതുല്യമെൻ സ്വർഗം
നില്പൂ പർവതമനേകമിവിടെ
പ്രവഹിപ്പൂ നദികൾ

കാടുകൾ വയലുകളുദ്യാനങ്ങൾ
പകരുന്നൂ സൗഖ്യം
കിണറുകൾ പൊയ്കകൾ വൃക്ഷലതാദിക-
ളിവിടെ വിരാജിപ്പൂ
സുഗന്ധപവനൻ വീശീടുന്നൂ
വിളങ്ങിടുന്നർക്കൻ
കാലംതോറും പെയ്തീടുന്നൂ
പുതുനീർ മേഘങ്ങൾ
പുഷ്പഫലങ്ങളുമേന്തി വരുന്നു-
ണ്ടൃതുക്കളോരോന്നും
നമുക്കു ചുറ്റും നാമ്പിട്ടുയരും
സുസ്ഥിതിയിതുതന്നെ
ഇതിന്റെ പരിപാലനമതിനെന്നും
യോഗ്യർ നാം തന്നെ..

**विशेषप्रवर्तनम्-2** **विशेषपरिगणनार्हाः छात्राः प्रकृतिचित्रं विलिख्य वर्णलेपनं कुर्वन्ति।**

**गवेषणसाध्यता** **भूमिः, जलम्, वायुः, तेजः, आकाशम् इत्येतेषां दूषणं केन केन प्रकारेण भवति इति सर्वदा निरीक्ष्य तन्निवारणाय यतते।**

**अग्रिमपाठ-प्रवेशकप्रवर्तनम्।** **प्रकृतेः सौन्दर्यनाशनं कथं भवति इति विषये चर्चां कृत्वा क्रोडीकरणम्।**

**अनुबन्धः** **संस्कृतमाधुरी - बालकवितासमाहरपुस्तकम्।**

# पाठः २ जीवातुरेव द्रुमः

| | | |
|---|---|---|
| एककम् | : | 1 |
| पाठः | : | 2 |
| पाठभागस्य नाम | : | जीवातुरेव द्रुमः |
| आशय: | : | परितस्थिति: विकासश्च। |
| उपाशय: | : | प्रकृतिसंरक्षणम् |
| व्यवहाररूपम् | : | कथा |
| कालांश: | : | 12 |

पठनलक्ष्याणि

आशयपराणि

- सस्यानि जीवस्य आधारभूतानि इति प्रत्यभिजानाति।
- सस्यानां संरक्षणम् अस्माकं कर्तव्यमिति प्रत्यभिजानाति।

भाषापराणि

- कथां पठित्वा सम्भाषणं लिखति।
- सूचनानुसारं जीवनचरितं लिखति।
- समानार्थकपदानि चित्वा लिखति।
- भूतकालक्रियापदानि उपयुज्य वाक्यानि लिखति।
- त्त्वान्त-ल्यबन्त-तुमुन्नन्त-अव्ययानां पट्टिकां लिखति।

उद्ग्रथनम् : परिस्थितेः संरक्षणम्।

Draft Copy

**आमुखम्**

प्रथमे पाठे वृक्षलतादिभिः सम्पन्नस्य विश्वस्य सौन्दर्यमधिकृत्य वयम् अपठाम। इदानीम् अस्मिन् पाठे वृक्षलतादीनां संरक्षणस्य प्राधान्यमधिकृत्य पठामः। सस्यानि अपि मानवा इव प्राणान् धरन्ति सुखदुःखान्यनुभवन्ति च। महाभारतादिषु पौराणिकग्रन्थेषु सस्यानां जीवनं वा न वा इति विषये चर्चां द्रष्टुं शक्यते। अधुनिककाले सस्यशास्त्रज्ञः जे.सी. बोस् महाशयः सस्यानां जीवनमस्ति इति स्थिरीचकार। जीवातुरेव द्रुमः इति पाठेऽस्मिन् एतद्विषयसम्बन्धिनीं काञ्चन लघुकथां पठामः।

**पाठविवरणम्**

केचित् बालकाः क्रीडामध्ये कस्यचन बालवृक्षस्य शाखां कर्तयितुं यतन्ते। तत् दृष्ट्वा काचन महिला तन्निवारयति। वृक्षस्य जीवनमस्ति वा? न वा? इति बालकानां सन्देहदूरीकरणाय पौराणिकानां तथा आधुनिकसस्यशास्त्रज्ञानां तत्सबन्धिनं विवरणम् अध्यापकः लघुवाक्यैः कथयति।

**उद्ग्रथनसमीपनम्**

परितःस्थितेः संरक्षणाय वृक्षसंरक्षणमेव प्राक्करणीयम्। अस्मान् परितः वृक्षलतादयः सर्वत्र सुलभतया सन्ति चेत् शुद्धवायुः लभ्यते। अत्युष्णस्य शान्तिः भविष्यति। भूगर्भे जलसंभरणं भवति। मृत्प्रवाहं निरुन्धति। विश्वस्य सौन्दर्यमपि विवर्धते च इति चिन्तां जनयितुं पाठोयं सहायकरः भवन्ति। अपि च भारतीयानां पौराणिकं नवीनं च शास्त्रविज्ञानमधिकृत्य च जिज्ञासां जनयति च।

**प्रश्ननिर्धारणम्** इदानीन्तनपरितःस्थितिरतीव कलुषिता भयानकी च भवति। कालावस्थाव्यतियानं सर्वत्र सदा क्लेशं जनयति। अतः अस्मद्दिनादारभ्य परितःस्थितेः संरक्षणाय वयं वर्तितव्याः इति मनोभावोत्पादनाय पर्याप्तो भवेत्।

**प्रवेशः** प्रपञ्चे के के प्राणान् धरन्ति ? चेतनानि अचेतानि कानि ? स्थावराणि कानि ? जङ्गमानि कानि ? इत्यादीन् प्रश्नान् पृच्छतु। जीवजालानि चतुर्विधानि सन्ति इति परिचायनमपि करोतु।

जीविनां चतुर्विधत्वम्।

उद्भिजम्, अण्डजम्, स्वेदजम्, जरायुजम् इति जीविनः चतुर्विधाः सन्ति। ये मृद्भित्वा जायन्ते ते तरुलतादयः उद्भिजाः।ये अण्डात् जायन्ते ते खगसर्पादयः अण्डजाः। स्वेदात् जाताः कृमिदंशाद्याः स्वेदजाः। जरायुः नाम गर्भाशयः। तस्मात् ये जायन्ते ते नरमृगाद्याः जरायुजः इति च कथ्यन्ते।

उद्भिदस्तरुगुल्माद्याः
नृमृगाद्या जरायुजाः ।
स्वेदजाः कृमिदंशाद्याः
पक्षिसर्पादयोऽण्डजाः ।। -इत्यमरः।

**पठनप्रवर्तनम्**

**प्रक्रिया- 1** **कथां पठित्वा सम्भाषणं रचयतु।**

अध्यापकः सस्यसंरक्षमधिकृत्य व्यक्तिशः एकं

Draft Copy

सम्भाषणं लेखनाय निर्दिशति। यथावसरम् उचितसाहाय्यमपि ददाति । वाचनानन्तरं सम्पुटरूपेण कक्ष्यायां प्रदर्शयति।

<u>मातृका</u>

छात्रः (अध्यापकं मार्गे दृष्ट्वा) - नमस्ते आचार्य!

अध्यापकः - नमस्ते को विशेषः।(तस्य हस्तं दृष्ट्वा) तव हस्ते किमस्ति ?

छात्रः - जपाकाण्डः। सोमस्य गृहात् आनयामि।

अध्यापकः - अद्यैव तत् रोपणं करिष्यति खलु ?

छात्रः - आम्। अद्यैव रोपयिष्यामि। नो चेत् तच्छुष्को भविष्यति।

अध्यापकः - उत्तमम्। सस्यानां रोपणं पालनञ्च सदा करणीयम् ।

छात्रः - धन्यवादः श्रीमन्।

**प्रक्रिया- 2 भूतकालक्रियापदानि चित्वा वाक्यानि रचयति।**

पाठभागे अनेकानि भूतकालक्रियापदानि सन्ति। तानि उपयुज्य अर्थपूर्णानि वाक्यानि यावच्छक्यं रचयतु। यः अधिकानि वाक्यानि रचयति तमभिनन्दयतु।

यथा-: -

अकरोत् - रबीन्द्रनाथठक्कुरः गीताञ्जलि नामकं गीतकम् अकरोत्।

आरभन्त - गीताञ्जलिं पठित्वा अनेके तस्य विवर्तनं कर्तुं प्रयत्नम् आरभन्त।

अवदत् - मातामहीं पौत्रं कथाम् अवदत्।

Draft Copy


**प्रक्रिया- 3** **अव्ययानां पट्टिकाकरणम्।**

पाठभागस्थितानां त्त्वान्त-तुमुन्नन्त-ल्यबन्तानाम् अन्येषमव्ययानां च पट्टिकाकरणाय निर्दिशतु। अन्येषाम् अव्ययानां सामान्यपट्टिकाम् अनुबन्धे दत्तामपि परिचाययतु।

**प्रक्रिया- 4** **जीवनचरितलेखनम्।**

सूचनानुसारं जीवनचरितलेखनम् तथा जीवनचरितं पठित्वा सूचकानां यथोचितपूरणं च करणीयम्। तदर्थम् एका मातृका अत्र दीयते।

<u>डा. एम् .एस् स्वामिनाथन्।</u>

भारतरत्नं डा. एम्. एस्. स्वामिनाथन्। 'भारतहरितक्रान्तेः पिता' इति प्रसिद्धः भवति . डा. एम्.एस्. स्वामिनाथन् महोदयः। सः 1925 तमे वर्षे आगस्ट् मासस्य सप्तमे दिनाङ्के जनिमलभत। तमिल्नाट् राज्यस्य कुम्भकोणमस्ति तस्य जन्मदेशः। डा. के.सदाशिवः तङ्कम् च तस्य पितरौ स्तः। कार्षिकमण्डलेषु तेन कृतानि परिष्काराणि अतीवश्रद्धेयानि भवन्ति। अतः सः हरितक्रान्तेः पिता इति पश्चात्प्रसिद्धो जातः। माग्सासे पुरस्कारः, पद्मश्रीः, पद्मभूषण् इत्यादिभिः पुरस्कारैः पूर्वमादृतोऽयं महानुभावः 2024 तमे वर्षे मरणानन्तरं भारतरत्नपुरस्कारेणापि समादृतोऽभूत्। 2023 सेप्तम्बर् 28 अस्ति तस्य मृत्युदिनम्।

Draft Copy

| | | |
|---|---|---|
| नाम | - | एम् .एस् स्वामिनाथन्। |
| जन्म | - | 1925 आगस्ट् 7। |
| जन्मदेशः | - | कुम्भकोणम्,तमिल्नाट्। |
| पितरौ | - | डा. के.सदाशिवः तङ्कम् । |
| पुरस्काराः | - | माग्सासे पुरस्कारः, पद्मश्रीः, पद्मभूषण, भारतरत्नम्। |
| प्रशस्ति | - | भारतहरितक्रान्तेः पिता। |
| मृत्युः | - | 2023 सेप्तम्बर् 28। |

**विशेषप्रवर्तनानि** विश्वपरितःस्थितिदिनाचरणम् इति विषयमधिकृत्य चित्ररचना, प्रभाषणश्च करणीयः।

**अनुबन्धप्रवर्तनानि** प्रवर्धमानशब्दकोशरचना।

**गवेषणसाध्यता** सस्यरोपणम्, संरक्षणम्, चिकित्सा इत्यादिषु विषयेषु प्राचीनानां नवीनानां च चिन्तापद्धतिमधिकृत्य चर्चा क्रोडीकरणश्च।

**अग्रिमपाठसम्बन्धं - प्रवर्तनम्** परितःस्थितेः अनुकूलता अस्माकं बाह्यसुरक्षायै प्रथमगणनीया भवति। तद्वत् अस्माकं आन्तरिकसुरक्षायै किं किं करणीयं भवति। तेषु च प्रथमपरिगणनार्हं किम्। तदधिकृत्य चर्चां नयतु। छात्राणामभिमतानि क्रोडीकुर्वन्तु।

**अवलम्बम्** जे सी बोस् महाभागस्य जीवनसूचिका।
वृक्षायुर्वेदः - सुरपालः

**ऐसिटी साध्यता** कथां चलच्चित्ररूपेण चित्रीकरणं कृत्वा प्रदर्शयति।

**अधिकवाचनांशः**

महाभारतस्य शान्तिपर्वणि चतुरशीत्यधिकशततमोऽध्याये भृगु-भरद्वाजसंवादे सस्यानां जीवोऽस्ति इति विषये चर्चा भवति। 'सस्यानि न शृण्वन्ति न पश्यन्ति गन्धरसान् न विन्दन्ति स्पर्शं न विजानन्ति । अतः तानि प्राणरहितानि तथा अचेतनानि भवन्ति' इत्यस्ति भरद्वाजस्याभिमतः तच्छ्रुत्वा भृगुस्तु कैश्चित् दृष्टान्तैः सस्सान्यपि प्राणान् धरन्ति इति व्यनक्ति। सस्यानि उष्णेन म्लायन्ते, तथा पुष्पफलानि च म्लायन्ते शीर्यन्ते च। अतः तेषां स्पर्शनज्ञानमस्ति। अग्निवाय्वशनीनां निर्घोषेण च तेषां पुष्पफलानि विशीर्यन्ते। अनेन हेतुना तेषां श्रवणशक्तिरस्ति इति वक्तुं शक्यते। यस्मिन् दूरे वृक्षास्तिष्ठन्ति तद्दूरं गत्वा लताः वृक्षान् वेष्टयन्ते। तासां दृष्टयः न सन्ति चेत् गमनमार्गं कथं विन्दन्ति। वृक्षणां पार्श्वे धूपयति चेत् ते रोगरहिताः सन्तः पुष्पिताः भवन्ति। अतः तेषां घ्राणशक्तिरप्यस्ति। वयं नालिकया कथं जलमूर्ध्वमानीय पिबामः तद्वत् ते पादैः सलिलमानीय पिबन्ति इत्यनेन पादपाः इति ज्ञायन्ते। तेषु व्याधीनां दर्शनेन व्याधिप्रतिक्रियया रोगशमनेन च तथा छिन्नस्य पुनः प्ररोहेण च ते सुखदुःखान्यनुभवन्ति च। एवं स्वविज्ञानमनुसृत्य भृगुः वृक्षाः जीवचैतन्ययुक्ताः इति समर्थयति। "जीवं पश्यामि वृक्षाणाम् अचैतन्यं न विद्यते" - इति महाभारतवचनं पौराणिकानां सस्यविज्ञानमधिकृत्य अस्मान् विबोधयति।

**जगदीष् चन्द्रबोस्** (1858-1937)

भारतीयसस्यशास्त्रज्ञेषु अन्यतमोऽस्ति जगदीष् चन्द्रबोस्। प्राणिनाम् इव सस्यानाम् अपि जीवः अस्ति इति सः परीक्षणनिरीक्षणैः संस्थापितवान् । तानि अपि व्रणितानि भवन्ति । तेषाम् अपि आघातः भवति । रासायनिकानां प्रयोगेण सस्यानि अपि प्रज्ञाहीनानि कर्तुं शक्यन्ते इति गवेषणसारं १९०१ वर्षे लण्डन्–नगरस्थायाः रायल्–सोसैट्याः अन्ताराष्ट्रिय–विज्ञानसम्मेलने सः उदघोषयत्।

सस्यानां सूक्ष्मं संवेदनम् अपि अभिज्ञातुं "रेसोनेण्ट्" नामकम् उपकरणम् अपि निर्मितवान् । अयं जगदीशचन्द्रबोसः सस्यजीवनस्य विषये स्वेन कृतान् प्रयोगान्, तेषां प्रयोगाणां फलं चापि "जीविनां निर्जीविनां च प्रतिक्रिया" (The Reaction of Living & Nonliving) इति पुस्तके उल्लिखितवान् अस्ति । तत् पुस्तकं १९०२ वर्षे प्रकाशितम् ।

Draft Copy


# एककम् २
# पलाशम्

## आमुखम्

यथा पल्लवं गच्छता कालेन पलाशत्वं प्राप्नोति तद्वत् छात्राः ललितपाठयोः पठनेन विज्ञानमार्जयित्वा प्रौढतराः जायन्ते। एतदवसरे व्यवहाररूपेष्वपि किञ्चित् प्रौढतरत्वं प्रदर्शयति पलाशाख्ये अस्मिन्नेकके। अत्र स्वास्थ्यप्रतिपादकः **सुखजीवनं** नाम सुभाषितपाठः, **क्षुधा ज्ञानप्रदायिनी** इति काचिच्चम्पूः, **हितमेवाश्नुयात् सदा** इति सम्भाषणपाठश्च आयोजितः।

Draft Copy

पाठः ३

# सुखजीवनम्।

| | | |
|---|---|---|
| एककम् | : | 2 |
| पाठः | : | 3 |
| पाठभागस्य नाम | : | सुखजीवनम्। |
| आशय: | : | भक्षणम् आरोग्यम्। |
| उपाशय: | : | आरोग्यशीलानि। |
| व्यवहाररूपम् | : | सुभाषितम् |
| कालांश: | : | 10 |

पठनलक्ष्याणि

<u>आशयपराणि</u>

- सुभाषितानि सतालमालपति।
- सुभाषितानामाशयमवगच्छति, लिखति च।
- आरोग्यविषये लघुटिप्पणीं लिखति।

<u>भाषापराणि</u>

- सुभाषितानां गद्यक्रमं लिखति।
- समस्तपदानां विग्रहं लिखति।
- संश्लिष्टपदानि विश्लिष्य लिखति।

उद्ग्रथनम् : आरोग्यशास्त्रम्।

**आमुखम्** पौराणिककालादारभ्य मानवाः आरोग्यसंरक्षणविषये दत्तश्रद्धाः अभवन्। मिताहारेण हितेन व्यायामेन पथ्यानुष्ठानेन च सुस्थितिः भविष्यतीति ज्ञातवन्तः ते तेषामनुभवज्ञानं विविधरूपेण उपदिशन्ति। चरकस्य चरकसंहिता, सुश्रुतस्य सुश्रुतसंहिता, कश्यपस्य काश्यपसंहिता, शार्ङ्गधरस्य शार्ङ्गधरसंहिता भावमिश्रस्य भावप्रकाशः, वाग्भटस्य अष्टाङ्गसंग्रहः, अष्टाङ्गहृदयः इत्यादयः प्रसिद्धाः आयुर्वेदग्रन्थाः भवन्ति। एतेषु ग्रन्थेषु स्वास्थ्यसंरक्षणोपायाः असकृत् प्रतिपादिताः। सुखजीवनं नामके अस्मिन् पाठभागे सुश्रुतसंहितायाः स्वीकृताः चत्वारः श्लोकाः दत्ताः।

**पाठविवरणम्** सुखजीवनम् इति अस्माकं पाठभागे आरोग्यसंरक्षणाय रोगाणां प्रतिरोधाय च पथ्यस्य तथा व्यायामस्य च प्राधान्यम् अवगमयितुं केचन श्लोकाः दत्ताः।

**उद्ग्रथनसमीपनम्** अधुना रुग्णः जनः रोगारम्भ एव भिषग्वरान् उपगच्छति। पथ्यस्य आहारस्य विश्रमस्य च अनुष्ठानेन रोगशमनं भवतीति न चिन्तयति। रोगप्रतिरोधरशक्तिं प्रवर्धयितुं पथ्याहारेण व्यायामेन च शक्यते ।

**प्रश्ननिर्धारणम्** उचितेन व्यायामेनापि स्वास्थ्यपूर्णं जीवनं यापयितुं शक्यते। एतादृशीं चिन्तामुपत्पादयितुं कायिकविद्याभ्यासस्य आवश्यकताम् अवबोधयितुं समर्थोऽयं पाठः।

**प्रवेशः** आरोग्यसंरक्षणाय सुखजीवनाय च किं किं कर्तव्यमिति अध्यापिका पृच्छति। चर्चां चालयति। क्रोडीकरोति। पठितपूर्वाणां सुभाषितानामालपनाय निर्दिशति च।

**पठनप्रवर्तनानि** **श्लोकान् सतालमालपति ।**

**प्रक्रिया- 1** छात्रान् सङ्घशः कृत्वा पाठभागस्थम् एकैकं सुभाषितम् एकैक सङ्घाय ददाति। उचितैः तालैः भावलयानुसारं सुभाषितस्य आलपनाय सङ्घान् निर्दिशति। सम्यक् आलपितान् सङ्घान् अनुमोदयति। आलपने जातान् दोषान् परिहरति च।

**प्रक्रिया- 2** **नूतनपदानि चित्वा अर्थं लिखति।**

शब्दकोशं निरीक्ष्य पाठभागस्थानां नूतनपदानाम् अर्थं प्रादेशिकभाषया संस्कृतभाषया च लेखनाय निर्दिशति।

**प्रक्रिया- 3** **गद्यक्रमं लिखति**

श्लोकानां गद्यक्रमलेखनाय आकांक्षारूपेण प्रश्नान् पृच्छति।

यथा-

| | | |
|---|---|---|
| क्रियापदं किम् | - | निवर्तते। |
| का निवर्तते | - | व्याधिः। |
| कैः विना व्याधिः निवर्तते | - | भेषजैः। |
| कस्य रोगः न निवर्तते | - | पथ्यविहीनस्य। |
| कैः न निवर्तते | - | शतैः। |
| केषां शतैः | - | भेषजानां शतैः। |

इत्यनेन प्रकारेण गद्यक्रमलेखनाय निर्दिशति। सर्वेषां पदानां स्वीकरणेन आशयानुसारेण औचित्यपूर्णतया च गद्यक्रमं लेखनीयम्।

**प्रक्रिया- 4** **श्लोकानाम् आशयं स्ववाक्यैः लिखति।**

श्लोकानाम् आशयं प्रादेशिकभाषया संस्कृतभाषया

च टिप्पणीपुस्तके लिखतु। आशयपूर्णता भाषाशैली चावश्यमावश्यकी।

**प्रक्रिया- 5** **आरोग्यविषये लघुटिप्पणीं लिखति।**

मातृका

आरोग्यसंरक्षणे मिताहारस्य, हिताहारस्य, व्यायामस्य च प्राधान्यम् अधिकृत्य सर्वे जानन्ति। तथापि वर्त्तमानकाले एतेषाम् अनुष्ठानं सम्यक् कर्तुं यः-कोपि न यतते। तस्मात् जीवनशैलीरोगाः इदानीं सर्वत्र परिपुष्टिं प्राप्नुवन्ति। बाल्य-यौवन-वार्धक्यभेदं विना जनाः रक्तादिमर्दः, प्रमेहः, भाराधिक्यम्, हृद्रोगः इत्येतैः रोगैः दूयमानाः भवन्ति।

**प्रक्रिया- 6** **स्वास्थ्यप्रतिपादकानि सुभाषितानि समाहृत्य सम्पुटं निर्माति।**

वैदिकीयसुभाषितानि, चरकसंहिता, नीतिसारं, अष्टाङ्गहृदयः इत्यादिषु ग्रन्थेषु आरोग्यसम्बन्धीनि अनेकानि सुभाषितानि सन्ति। तानि यथानुसारं स्वीकृत्य सम्पुटं निर्मातुम् आवश्यकं साहाय्यं ददातु।

केचन श्लोकाः

पानीयं प्राणिनां प्राणा विश्वमेव च तन्मयम्।
न हि तोयाद्विना वृत्तिः स्वस्थस्य व्याधितस्य वा।।
(अष्टाङ्गसङ्ग्रहः)

मनःशुद्ध्यैव शुद्धिःस्यात् देहिनां नात्र संशयः।
वृथा तद्व्यतिरेकेण कायस्यैव कदर्थनम्।।
(ज्ञानार्णवः)

नैर्मल्यं भावशुद्धिश्च विना स्नानं न युज्यते।
तस्मात् कार्यविशुद्ध्यर्थं स्नानमादौ विधीयते।।

(भविष्यपुराणम्)

यावदस्मिन् शरीरे प्राणो वसति तावदायुः।।

(कौशीतकी)

यावद् वायुः स्थितो देहे तावज्जीवनमुच्यते।
मरणं तस्य निष्क्रान्तिस्ततो वायुं निरोधयेत् ।।

(हठयोगप्रदीपिका)

व्यायामः स्थैर्यकराणाम्।।

( चरकसंहिता)

शरीरायासजननकं कर्म व्यायामसंज्ञितम्।।

(सुश्रुतसंहिता)

आयुः कामयमानेन धर्मार्थसुखसाधनम्।
आयुर्वेदोपदेशेषु विधेयः परमादरः।।

( अष्टाङ्गहृदयः)

**विविधानां व्यायमानां लघुचित्रीकरणं कृत्वा प्रदर्शयति।**

**अनुबन्धप्रवर्तनम्**

**विशेषप्रवर्तनम्**

छात्राः वैयक्तिकरूपेण वा सङ्घरूपेण वा विविधानां व्यायामानां लघुचित्रीकरणं वीडियो द्वारा अथवा कोलाष् रूपेण वा यावच्छक्यं रचयति। कक्ष्यायाम् अवतारयति।

**गवेषणसाध्यता**

एकैकस्य व्यायमस्य अनुशीलनेन के के गुणाः लभन्ते इति पुस्तकेभ्यः, अभिमुखेन, अन्तर्जालस्य साहायेन वा अवगच्छति।

**अग्रिमपाठसम्बन्धं - प्रवर्तनम्**

पथ्याहारेण तथा व्यायामेन आरोग्यपरिपालनं साध्यम्। किन्तु अनेके जनाः एकवारमपि भोजनम् अलभमानाः

Draft Copy


क्लिश्यन्ति। तदपि आरोग्य नाशने हेतुर्भवति। बुभुक्षया पीडितः किं किं न करोति इति चर्चां कृत्वा क्रोडीकृत्वा अग्रिमपाठं प्रविशति।

**अवलम्बम्** सुभाषितग्रन्थावली, वैदिकीयसुभाषितम्, योगविद्या।

**ऐसिटी साध्यता** श्लोकानाम् सतालमालपनम्, चित्रीकरणम्,